॥ श्रीगणेशाय नमः ॥ ॥ मुनिरुवाच ॥ ॥ कथं नाम्नां सहस्रं तं गणेश उपदिष्टवान् ॥ शिवदं तन्ममाचक्ष्व लोकानुग्रहतत्पर ॥ १ ॥ ब्रह्मोवाच ॥ ॥ देवः पूर्वं पुरारातिः पुरत्रयजयोद्यमे ॥ अनर्चनाद्गणेशस्य जातो विघ्नाकुलः किल ॥ २ ॥ मनसा स विनिर्धार्य ददृशे विघ्नकारणम् ॥ महागणपतिं भक्त्या समभ्यर्च्य यथाविधि ॥ ३ ॥ विघ्नप्रशमनोपायमपृच्छदपरिश्रमम् ॥ संतुष्टः पूजया शंभोर्महागणपतिः स्वयम् ॥ ४ ॥ सर्वविघ्नप्रशमनं सर्वकामफलप्रदम् ॥ ततस्तस्मै स्वयं नाम्ना सहस्रमिदमब्रवीत् ॥ ५ ॥ ॥ अस्य श्री महागणपतिसहस्रनामस्तोत्रमालामन्त्रस्य ॥ गणेश ऋषिः । महागणपतिर्देवता । नानाविधानि च्छन्दांसि । हुमिति बी-

जम्। तुङ्गमिति शक्तिः। स्वाहाशक्तिरिति कीलकम्॥ अथ न्यासादि। गणेश्वरो गणक्रीड इत्यङ्गुष्ठाभ्यां नमः। कुमार-गुरुरीशानेति तर्जनीभ्यां नमः। ब्रह्माण्डकुम्भश्चिद्व्योमेति मध्यमाभ्यां नमः। रक्तो रक्ताम्बरधर इत्यनामिकाभ्यां नमः। सर्वसद्गुरुसंसेव्य इति कनिष्ठिकाभ्यां नमः। लुप्तविघ्नः स्वभ-क्तानामिति करतलकरपृष्ठाभ्यां नमः॥अथहृदयादिन्यासः॥ छन्दश्छन्दोद्भव इति हृदयाय नमः। निष्कलो निर्मल इति शिरसे स्वाहा। सृष्टिस्थितिलयक्रीड इति शिखायै वषट्। ज्ञानं विज्ञानमानन्द इति कवचाय हुम्। अष्टाङ्गयोगफलभृ-दिति नेत्रत्रयाय वौषट्। अनन्तशक्तिसहित इत्यस्त्राय फट्। इति दिग्बन्धः॥ अथ ध्यानम्॥ गजवदनमचिन्त्यं तीक्ष्ण-

दंष्ट्रं त्रिनेत्रं बृहदुदरमशेषं भूतिराजं पुराणम्॥ अमरवरसु-पूज्यं रक्तवर्णं सुरेशं पशुपतिसुतमीशं विघ्नराजं नमामि॥ १॥ सकलविघ्नविनाशनद्वारा श्रीमहागणपतिप्रसाद-सिद्ध्यर्थे जपे विनियोगः॥ ॥श्रीमहागणपतिरुवाच॥ ॥ॐ गणेश्वरो गणक्रीडो गणनाथो गणाधिपः॥ एकदन्तो वक्रतुण्डो गजवक्त्रो महोदरः॥ १॥ लम्बोदरो धूम्रवर्णो विकटो विघ्ननाशनः॥ सुमुखो दुर्मुखो बुद्धो विघ्नराजो गजा-ननः॥ २॥ भीमः प्रमोद आमोदः सुरानन्दो मदोत्कटः॥ हेरम्बः शम्बरः शम्भुर्लम्बकर्णो महाबलः॥ ३॥ नन्दनो लम्पटो भीमो मेघनादो गणंजयः॥ विनायको विरूपाक्षो वीरः शूरवरप्रदः॥ ४॥ महागणपतिर्बुद्धिप्रियः क्षिप्रप्र-

सादनः ॥ रुद्रप्रियो गणाध्यक्ष उमापुत्रोऽघनाशनः ॥ ५ ॥
कुमारगुरुरीशानपुत्रो मूषकवाहनः ॥ सिद्धिप्रियः सिद्धिप-
तिः सिद्धः सिद्धिविनायकः ॥ ६ ॥ अविघ्नस्तुम्बरुः सिंहवा-
हनो मोहिनीप्रियः ॥ कटङ्कगो राजपुत्रः शाकलः संमितो-
मितः ॥ ७ ॥ कूष्माण्डसामसंभूतिर्दुर्जयो धूर्जयो जयः ॥
भूपतिर्भुवनपतिर्भूतानां पतिरव्ययः ॥ ८ ॥ विश्वकर्ता वि-
श्वमुखो विश्वरूपो निधिर्गुणः ॥ कविः कवीनामृषभो ब्रह्म-
ण्यो ब्रह्मवित्प्रियः ॥ ९ ॥ ज्येष्ठराजो निधिपतिर्निधिप्रिय-
पतिप्रियः ॥ हिरण्मयपुरान्तस्थः सूर्यमण्डलमध्यगः ॥१०॥ ३
कराहतिध्वस्तसिन्धुसलिलः पूषदन्तभित् ॥ उमाङ्ककेलि-
कुतुकी मुक्तिदः कुलपावनः ॥ ११ ॥ किरीटी कुण्डली हारी

वनमाली मनोमयः ॥ वैमुख्यहतदैत्यश्रीः पादगत्या जित-
क्षितिः ॥ १२ ॥ सद्योजातः स्वर्णमुञ्जमेखली दुर्निमित्तहृत् ॥
दुःस्वप्नदुष्टशमनो गुणी नादप्रतिष्ठितः ॥ १३ ॥ सुरूपः
सर्वनेत्राधिवासो विभ्राजिनूपुरः ॥ पीताम्बरः खण्डरदः ख-
ण्डवैशाखसंस्थितः ॥ १४ ॥ चित्राङ्गः श्यामदशनो भाल-
चन्द्रो हविर्भुजः ॥ योगाधिपस्तारकस्थः पुरुषो गजगर्णकः
॥ १५ ॥ गणाधिराजो विजयः स्थिरो गजपतिर्ध्वजी ॥ दे-
वदेवः स्मरः प्राणदीपको वायुकीलकः ॥ १६ ॥ विपश्चिद्व-
रदो वादो नादभिन्नमहाचलः ॥ वराहरदनो मृत्युंजयो व्या-
घ्राजिनाम्बरः ॥ १७ ॥ इच्छाशक्तिधरो देवत्रातो दैत्यवि-
मर्दनः ॥ शम्भुवक्त्रोद्भवः शम्भुकोपजः शम्भुहास्यभूः

॥ १८ ॥ शम्भुतेजाः शिवाशोकहारी गौरीसुखावहः ॥ उमाङ्गमलजो गौरीतेजोभूः स्वर्धुनीभवः ॥ १९ ॥ मर्त्यकायो महानादो गिरिवर्ष्मा शुभाननः ॥ सर्वात्मा सर्वदेवात्मा ब्रह्ममूर्धा ककुप्श्रुतिः ॥ २० ॥ ब्रह्माण्डकुम्भश्चिद्व्योमभालसत्यशिरोरुहः ॥ जगज्जन्मलयोन्मेषनिमेषोऽह्न्यर्कसोमदृक् ॥ २१ ॥ गिरीन्द्रैकरदो धर्मो धर्मिष्ठः सामबृंहितः ॥ ग्रहर्क्षदशनो वाणीजिह्वो वासवनासिकः ॥ २२ ॥ भ्रूमध्यसंस्थितकरो ब्रह्मविद्यामदोदकः ॥ कुलाचलांसः सोमार्कघण्टो रुद्रशिरोधरः ॥ २३ ॥ नदीनदभुजः सर्पाङ्गुलीकस्तारकानखः ॥ व्योमनाभिः श्रीहृदयो मेरुपृष्ठोऽर्णवोदरः ॥ २४॥ कुक्षिस्थयक्षगन्धर्वरक्षःकिन्नरमानुषः॥ पृथ्वीकटिः सृष्टिलिङ्गः शैलो-

रुर्दस्रजानुकः ॥ २५॥ पातालजङ्घो मुनिपात्कालाङ्गुष्ठस्त्रयीतनुः॥ ज्योतिर्मण्डललाङ्गूलो हृदयालाननिश्चलः ॥ २६ ॥ हृत्पद्मकर्णिकाशाली वियत्केलिसरोवरः ॥ सद्भक्तध्याननिगडः पूजावारिनिवारितः ॥ २७ ॥ प्रतापी काश्यपो मन्ता गणको विष्टपी बली ॥ यशस्वी धार्मिको जेता प्रमथः प्रमथेश्वरः ॥ २८ ॥ चिन्तामणिर्द्वीपपतिः कल्पद्रुमवनालयः ॥ रत्नमण्डपमध्यस्थो रत्नसिंहासनाश्रयः ॥ २९ ॥ तीव्राशिरोद्वृतपदो ज्वालिनीमौलिलालितः ॥ नन्दानन्दितपीठश्रीर्भोगदो भूषितासनः ॥ ३० ॥ सकामदायिनीपीठः स्फुरदुग्रासनाश्रयः ॥ तेजोवतीशिरोरत्नं सत्यानित्यावतंसितः ॥ ३१ ॥ सविघ्ननाशिनीपीठः सर्वशक्त्यम्बुजालयः ॥ लि-

पिपद्मासनाधारो वह्निधामत्रयालयः ॥ ३२ ॥ उन्नतप्रपदो गूढगुल्फः संवृत्तपार्ष्णिकः ॥ मीनजङ्घः श्लिष्टजानुः स्थूलोरुः प्रोन्नमत्कटिः ॥ ३३ ॥ निम्ननाभिः स्थूलकुक्षिः पीनवक्षा बृहद्भुजः ॥ पीनस्कन्धः कम्बुकण्ठो लम्बोष्ठो लम्बनासिकः ॥ ३४ ॥ भग्नवामरदस्तुङ्गः सव्यदन्तो महाहनुः ॥ ह्रस्वनेत्रत्रयः शूर्पकर्णो निबिडमस्तकः ॥ ३५ ॥ स्तबकाकारकुम्भाग्रो रत्नमौलिर्निरङ्कुशः ॥ सर्पहारकटीसूत्रः सर्पयज्ञोपवीतवान् ॥ ३६ ॥ सर्पकोटीरकटकः सर्पग्रैवेयकाङ्गदः ॥ सर्पकक्षोदराबन्धः सर्पराजोत्तरच्छदः ॥३७॥ रक्तो रक्ताम्बरधरो रक्तमालाविभूषणः ॥ रक्तेक्षणो रक्तकरो रक्ततालोष्ठपल्लवः ॥ ३८ ॥ श्वेतः श्वेताम्बरधरः श्वेतमालाविभूषणः ॥ श्वेता- सह- ५ ५

तपत्ररुचिरः श्वेतचामरवीजितः ॥ ३९ ॥ सर्वावयवसंपूर्णः सर्वलक्षणलक्षितः ॥ सर्वाभरणशोभाढ्यः सर्वशोभासमन्वितः ॥ ४० ॥ सर्वमङ्गलमाङ्गल्यः सर्वकारणकारणम् ॥ सर्वदेववरः शार्ङ्गी बीजपूरी गदाधरः ॥ ४१ ॥ शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः ॥ किरीटी कुण्डली हारी वनमाली शुभाङ्गदः ॥ ४२ ॥ इक्षुचापधरः शूली चक्रपाणिः सरोजभृत् ॥ पाशी धृतोत्पलः शाली मञ्जरीभृत्स्वदन्तभृत् ॥ ४३ ॥ कल्पवल्लीधरो विश्वाभयदैककरो वशी ॥ अक्षमालाधरो ज्ञानमुद्रावान्मुद्गरायुधः ॥ ४४ ॥ पूर्णपात्री कम्बुधरो विधृताङ्कुशमूलकः ॥ करस्थाम्रफलश्चूतकलिकाभृत्कुठारवान् ॥ ४५ ॥ पुष्करस्थः स्वर्णघटीपूर्णरत्नाम्बुवर्षकः ॥

भारतीसुन्दरीनाथो विनायकरतिप्रियः ॥ ४६ ॥ महालक्ष्मी-
प्रियतमः सिद्धलक्ष्मीमनोरमः ॥ रमारमेशपूर्वाङ्गो दक्षि-
णोमामहेश्वरः ॥ ४७ ॥ महीवराहवामाङ्गो रतिकन्दर्पपश्चि-
मः ॥ आमोदमोदजननः सप्रमोदप्रमोदनः ॥४८॥ संवर्धि-
तमहावृद्धिर्ऋद्धिसिद्धिप्रवर्धनः ॥ दन्तसौमुख्यसुमुखः का-
न्तिकन्दलिताश्रयः ॥ ४९ ॥ मदनावत्याश्रिताङ्घ्रिः कृतवैमु-
ख्यदुर्मुखः ॥ विघ्नसंप्लुवः पद्मः सर्वोन्नतमदद्रवः ॥ ५० ॥
विघ्नकृन्निघ्नचरणो द्राविणी शक्तिसत्कृतः ॥ तीव्राप्रसन्ननय-
नो ज्वालिनीपालितैकदृक् ॥ ५१ ॥ मोहिनीमोहनो भो-
गदायिनीकान्तिमण्डनः ॥ कामिनीकान्तवक्त्रश्रीस्तेजिन्य-
धिष्ठितैकदिक् ॥ ५२ ॥ वसुधारामदोन्मादो महाशङ्खनिधिः

प्रियः ॥ नमद्वसुमतीमाली महापद्मनिधिः प्रभुः ॥५३॥ स-
र्वसद्गुरुसंसेव्यः शोचिष्केशहृदाश्रयः ॥ ईशानमूर्धा देवेन्द्र-
शिखः पवननन्दनः ॥ ५४ ॥ प्रत्युग्रनयनो दिव्यो दिव्या-
स्त्रशतपर्वधृक् ॥ ऐरावतादिसर्वाशावारणो वारणप्रियः
॥ ५५ ॥ वज्राद्यस्त्रपरीवारो गणचण्डसमाश्रयः ॥ जयाज-
यपरिकरो विजयाविजयावहः ॥५६॥ अजयार्चितपादाब्जो
नित्यानन्दवनस्थितः ॥ विलासिनीकृतोल्लासः शौण्डी सौन्द-
र्यमण्डितः ॥ ५७ ॥ अनन्तानन्तसुखदः सुमङ्गलसुमङ्गलः ॥
ज्ञानाश्रयः क्रियाधार इच्छाशक्तिनिषेवितः ॥ ५८ ॥ सुभ-
गासंश्रितपदो ललितालालिताश्रयः ॥ कामिनीपालनः का-
मकामिनीकेलिलालितः ॥ ५९ ॥ सरस्वत्याश्रयो गौरीन-

न्दनः श्रीनिकेतनः ॥ गुरुर्गुप्तपदो वाचासिद्धो वागीश्वरी-
पतिः ॥ ६० ॥ नलिनीकामुको वामारामो ज्येष्ठामनोरमः
॥ रौद्री मुद्रितपादाब्जो हुंबीजस्तुङ्गशक्तिकः ॥ ६१ ॥ वि-
श्वादिजननत्राणः स्वाहाशक्तिः सकीलकः ॥ अमृताब्धिकृ-
तावासो मदघूर्णितलोचनः ॥ ६२ ॥ उच्छिष्टोच्छिष्टगणको
गणेशो गणनायकः ॥ सार्वकालिकसंसिद्धिर्नित्यसेव्यो दि-
गम्बरः ॥ ६३ ॥ अनपायोऽनन्तदृष्टिरप्रमेयो जरामरः ॥ अ-
नाविलोऽप्रतिहतिरच्युतोऽमृतमक्षरः ॥ ६४ ॥ अप्रतर्क्योऽक्ष-
योऽजय्योऽनाधारोऽनामयोऽमलः ॥ अमेयसिद्धिरद्वैतमघो-
रोऽग्निसमाननः ॥ ६५ ॥ अनाकारोऽब्धिभूम्यग्निबलघ्नोऽव्य-
क्तलक्षणः ॥ आधारपीठमाधार आधाराधेयवर्जितः ॥ ६६ ॥

आखुकेतन आशापूरकआखुमहारथः ॥ इक्षुसागरमध्यस्थ
इक्षुपायसभक्षकः ॥ ६७ ॥ इक्षुचापातिरेकश्रीरिक्षुचापनिषे-
वितः ॥ इन्द्रगोपसमानश्रीरिन्द्रनीलसमद्युतिः ॥ ६८ ॥ इ-
न्दीवरदलश्याम इन्दुमण्डलमण्डितः ॥ इध्मप्रिय इडाभाग
इडावानिन्दिराप्रियः ॥ ६९ ॥ इक्ष्वाकुविघ्नविध्वंसी इतिक-
र्तव्यतोत्थितः ॥ ईशानमौलिरीशान ईशानप्रिय ईतिहा
॥ ७० ॥ ईषणात्रयकल्पान्त ईहामात्रविवर्जितः ॥ उपेन्द्र
उडुभृन्मौलिरुडुनाथकरप्रियः ॥ ७१ ॥ उन्नतानन उत्तुङ्ग उदा-
रास्त्रिदशाग्रणीः ॥ ऊर्जस्वानुष्मलमद ऊहापोहदुरासदः
॥ ७२ ॥ ऋग्यजुःसामनयन ऋद्धिसिद्धिसमर्पकः ॥ ऋजु-
चित्तैकसुलभो ऋणत्रयविमोचनः ॥ ७३ ॥ लुप्तविघ्नः स्वभ-

क्तानां लुप्तशक्तिः सुरद्विषाम् ॥ लुप्तश्रीर्विमुखार्चानां लूता-
विस्फोटनाशनः ॥७४॥ एकारपीठमध्यस्थ एणपीठकृतास-
नः ॥ एजिताखिलदैत्यश्रीरेधिताखिलसंश्रयः ॥ ७५ ॥ ऐ-
श्वर्यनिधिरैश्वर्यमैहिकामुष्मिकप्रदः ॥ ऐरंमदसमोन्मेष ऐ-
रावतसमाननः ॥ ७६ ॥ ओंकारवाच्य ओंकार ओजस्वानौ-
षधीपतिः ॥ औदार्यनिधिरौद्धत्यधैर्य औन्नत्यनिःसमः ॥
॥७७॥ अङ्कुशः सुरनागानामङ्कुशाकारसंस्थितः ॥ अः
समस्तविसर्गान्तपदेषु परिकीर्तितः ॥ ७८ ॥ कमण्डलुधरः
कल्पः कपर्दी कलभाननः ॥ कर्मसाक्षी कर्मकर्ता कर्माक-
र्मफलप्रदः ॥ ७९ ॥ कदम्बगोलकाकारः कूष्माण्डगणनाय-
कः ॥ कारुण्यदेहः कपिलः कथकः कटिसूत्रभृत् ॥ ८० ॥

खर्वः खड्गप्रियः खड्गः खान्तान्तस्थः खनिर्मलः ॥ खल्वाटशृ-
ङ्गनिलयः खट्वाङ्गी खदुरासदः ॥८१॥ गुणाढ्यो गहनो गद्यो
गद्यपद्यसुधार्णवः ॥ गद्यगानप्रियो गर्जो गीतगीर्वाणपूर्व-
जः ॥८२॥ गुह्याचाररतो गुह्यो गुह्यागमनिरूपितः ॥ गुहा-
शयो गुडाब्धिस्थो गुरुगम्यो गुरोर्गुरुः ॥८३॥ घण्टाघर्घरि-
कामाली घटकुम्भो घटोदरः ॥ ङकारवाच्यो ङाकारो ङका-
राकारशुण्डभृत् ॥ ८४ ॥ चण्डश्चण्डेश्वरश्चण्डी चण्डेशश्च-
ण्डविक्रमः ॥ चराचरपिता चिन्तामणिश्चर्वणलालसः ॥८५॥
छन्दश्छन्दोद्भवश्छन्दो दुर्लक्ष्यश्छन्दविग्रहः ॥ जगद्योनिर्ज-
गत्साक्षी जगदीशो जगन्मयः ॥८६॥ जप्यो जपपरो जाप्यो
जिह्वासिंहासनप्रभुः ॥ स्रवद्गण्डोल्लसद्दानझङ्कारिभ्रमराकु-

लः ॥८७॥टङ्कारस्फारसंरावष्टङ्कारमणिनूपुरः॥ उद्वयः पल्लु-
वान्तस्थः सर्वमन्त्रेषु सिद्धिदः ॥८८॥ डिण्डिमुण्डो डाकिनी-
शो डामरो डिण्डिमप्रियः॥ ढक्कानिनादमुदिरो ढौङ्को ढुण्ढि-
विनायकः॥ ८९ ॥ एकारवाच्यो वागीशो विश्वात्मा विश्व-
भावनः ॥ तत्त्वानां प्रकृतिस्तत्त्वं तत्त्वंपदनिरूपितः ॥९०॥
तारकान्तरसंस्थानस्तारकस्तारकान्तकः ॥ स्थाणुः स्थाणु-
प्रियः स्थाता स्थावरं जङ्गमं जगत् ॥ ९१ ॥ दक्षयज्ञप्रमथ-
नो दाता दानं दमो दयः॥ दयावान्दिव्यविभवो दण्डभृद्दण्ड-
नायकः॥ ९२ ॥ दन्तप्रभिन्नाभ्रमालो दैत्यवारणदारणः ॥
दंष्ट्रालग्नद्वीपघटो देवार्थनृगजाकृतिः ॥ ९३ ॥ धनं धनप-
तेर्बन्धुर्धनदो धरणीधरः ॥ ध्यानैकप्रकटो ध्येयो ध्यानं ध्या-

सह. ९

नपरायणः ॥ ९४ ॥ ध्वनिप्रकृतिचित्कारो ब्रह्माण्डावलि-
मेखलः ॥ नन्द्यो नन्दिप्रियो नादो नादमध्यप्रतिष्ठितः ॥
॥९५॥ निष्कलो निर्मलो नित्यो नित्यानित्यो निरामयः ॥
परं व्योम परं धाम परमात्मा परं पदम् ॥ ९६ ॥ परात्परः
पशुपतिः पशुपाशविमोचनः ॥ पूर्णानन्दः परानन्दः पुरा-
णपुरुषोत्तमः ॥ ९७ ॥ पद्मप्रसन्नवदनः प्रणताज्ञाननाश-
नः ॥ प्रमाणप्रत्ययातीतः प्रणतार्तिनिवारणः ॥ ९८ ॥ फ-
णिहस्तः फणिपतिः फूत्कारः फणितप्रियः ॥ बाणार्चिताङ्घ्रि-
युगलो बालकेलीकुतूहली ॥ ९९ ॥ ब्रह्म ब्रह्मार्चितपदो ब्र-
ह्मचारी बृहस्पतिः ॥ बृहत्तरो ब्रह्मपरो ब्रह्मण्यो ब्रह्मवित्प्रि-
यः ॥ १०० ॥ भ्रूक्षेपदत्तलक्ष्मीको भर्गो भद्रो भयापहः ॥

भगवान् भक्तिसुलभो भूतिदो भूतिभूषणः ॥ १ ॥ भव्यो भूतालयो भोगदाता भ्रूमध्यगोचरः ॥ मन्त्रो मन्त्रपतिर्मन्त्री मदमत्तो मनोमयः ॥ २ ॥ मेखलाहीश्वरो मन्दगतिर्मन्दनिभेक्षणः ॥ महाबलो महावीर्यो महाप्राणो महामनाः ॥ ३ ॥ यज्ञो यज्ञपतिर्यज्ञगोप्ता यज्ञफलप्रदः ॥ यशस्करो योगगम्यो याज्ञिको याजकप्रियः ॥ ४ ॥ रसो रसप्रियो रस्यो रञ्जको रावणार्चितः ॥ राज्यरक्षाकरो रत्नगर्भो राज्यसुखप्रदः ॥५॥ लक्षो लक्षपतिर्लक्ष्यो लयस्थो लड्डुकप्रियः ॥ लानप्रियो लास्यपरो लाभकृल्लोकविश्रुतः ॥ ६ ॥ वरेण्यो वह्निवदनो वन्द्यो वेदान्तगोचरः ॥ विकर्ता विश्वतश्चक्षुर्विधाता विश्वतोमुखः ॥ ७ ॥ वामदेवो विश्वनेता वज्रिवज्र- सह. १०

निवारणः ॥ विवस्वद्बन्धनो विश्वाधारो विश्वेश्वरो विभुः ॥ ८ ॥ शब्दब्रह्मशमप्राप्यः शम्भुशक्तिर्गणेश्वरः ॥ शास्ता शिखाग्रनिलयः शरण्यः शम्बरेश्वरः ॥ ९ ॥ षड्ऋतुकुसुमस्रग्वी षडाधारः षडक्षरः ॥ संसारवैद्यः सर्वज्ञः सर्वभेषजभेषजम् ॥ ११० ॥ सृष्टिस्थितिलयक्रीडः सुरकुञ्जरभेदकः ॥ सिन्दूरितमहाकुम्भः सदसद्भक्तिदायकः ॥ ११ ॥ साक्षी समुद्रमथनः स्वयंवेद्यः स्वदक्षिणः ॥ स्वतन्त्रः सत्यसंकल्पः सामगानरतः सुखी ॥ १२ ॥ हंसो हस्तिपिशाचीशो हवनं हव्यकव्यभुक्॥हव्यं हुतप्रियो हृष्टो हृल्लेखामन्त्रमध्यगः ॥ १३ ॥ क्षेत्राधिपः क्षमाभर्त्ता क्षमा क्षमपरायणः॥ क्षिप्रक्षेमकरः क्षेमानन्दः क्षोणीसुरद्रुमः ॥ १४ ॥ धर्मप्रदोर्थदः

कामदाता सौभाग्यवर्धनः ॥ विद्याप्रदो विभवदो भुक्तिमुक्तिफलप्रदः ॥ १५ ॥ अभिरूप्यकरो वीरश्रीप्रदो विजयप्रदः ॥ सर्ववश्यकरो गर्भदोषहा पुत्रपौत्रदः ॥ १६ ॥ मेधादः कीर्तिदः शोकहारी दौर्भाग्यनाशनः ॥ प्रतिवादिमुखस्तम्भो रुष्टचित्तप्रसादनः ॥ १७ ॥ पराभिचारशमनो दुःखहा बन्धमोक्षदः ॥ लवस्त्रुटिः कला काष्ठा निमेषस्तत्परक्षणः ॥ १८ ॥ घटी मुहूर्तः प्रहरो दिवा नक्तमहर्निशम् ॥ पक्षो मासर्त्वयनाब्दयुगं कल्पो महालयः ॥ १९ ॥ राशिस्तारा तिथिर्योगो वारः करणमंशकम् ॥ लग्नं होरा कालचक्रं मेरुः सप्तर्षयो ध्रुवः ॥ १२० ॥ राहुर्मन्दः कविर्जीवो बुधो भौमः शशी रविः ॥ कालः सृष्टिः स्थितिर्विश्वं स्थावरं जङ्गमं जगत् ॥ २१ ॥ भूरापोऽग्निर्मरुद्व्योमाहंकृतिः प्रकृतिः पुमान् ॥ ब्रह्मा विष्णुः शिवो रुद्र ईशः शक्तिः सदाशिवः ॥ २२ ॥ त्रिदशाः पितरः सिद्धा यक्षा रक्षांसि किन्नराः ॥ सिद्धविद्याधरा भूता मनुष्याः पशवः खगाः ॥ २३ ॥ समुद्राः सरितः शैला भूतं भव्यं भवोद्भवः ॥ साङ्ख्यं पातञ्जलं योगं पुराणानि श्रुतिः स्मृतिः ॥ २४ ॥ वेदाङ्गानि सदाचारो मीमांसान्यायविस्तरः ॥ आयुर्वेदो धनुर्वेदो गान्धर्वं काव्यनाटकम् ॥२५॥ वैखानसं भागवतं मानुषं पाञ्चरात्रकम् ॥ शैवं पाशुपतं कालमूर्खभैरवशासनम् ॥ २६ ॥ शाक्तं वैनायकं सौरं जैनमार्हतसंहिता ॥ सदसद्व्यक्तमव्यक्तं सचेतनमचेतनम् ॥ २७ ॥ बन्धो मोक्षः सुखं भोगो योगः सत्य-

मणुर्महान् ॥ स्वस्ति हुंफट् स्वधा स्वाहा श्रौषट् वौषट् व-
षट् समः ॥ २८ ॥ ज्ञानं विज्ञानमानन्दो बोधः संवित्समः
शमः ॥ एक एकाक्षराधार एकाक्षरपरायणः ॥ २९ ॥ एका-
ग्रधीरेकवीर एकोनेकस्वरूपधृक् ॥ द्विरूपो द्विभुजो द्व्यक्षो
द्विरदो द्वीपरक्षकः ॥ १३० ॥ द्वैमातुरो द्विवदनो द्वन्द्वहीनो
द्व्यातिगः ॥ त्रिधामा त्रिकरस्त्रेता त्रिवर्गफलदायकः ॥३१॥
त्रिगुणात्मा त्रिलोकादिस्त्रिशक्तीशस्त्रिलोचनः ॥ चतुर्विध-
वचोवृत्तिः परिवृत्तिः प्रवर्तकः ॥ ३२ ॥ चतुर्मुखमयोपाय-
श्चतुर्वर्णाश्रमाश्रयः ॥ चतुर्थीपूजनप्रीतश्चतुर्थीतिथिसंभवः
॥ ३३ ॥ चतुर्बाहुश्चतुर्दन्तश्चतुरात्मा चतुर्भुजः ॥ पञ्चाक्षरा-
त्मा पञ्चात्मा पञ्चास्यः पञ्चकृत्तमः ॥ ३४ ॥ पञ्चाधारः पञ्चव-

र्णः पञ्चाक्षरपरायणः ॥ पञ्चतालः पञ्चकरः पञ्चप्रणवमातृकः
॥ ३५ ॥ पञ्चब्रह्ममयस्फूर्तिः पञ्चावरणवारितः ॥ पञ्चभक्ष-
प्रियः पञ्चबाणः पञ्चशिखात्मकः ॥ ३६ ॥ षट्कोणपीठः ष-
ट्चक्रधामा षड्ग्रन्थिभेदकः ॥ षडङ्गध्वान्तविध्वंसी षडङ्गुलम-
हाह्रदः ॥३७॥ षण्मुखः षण्मुखभ्राता षट्शक्तिपरिवारितः ॥
षड्वैरिवर्गविध्वंसी षड्ऊर्मिभयभञ्जनः ॥ ३८ ॥ षट्कर्कदूरः
षट्मी षड्गुणः षड्साश्रयः ॥ सप्तपातालचरणः सप्तद्वीपोरु-
मण्डलः ॥३९॥ सप्तस्वर्लोकमुकुटः सप्तसप्तिवरप्रदः ॥ सप्ता-
ङ्गराज्यसुखदः सप्तर्षिगणवन्दितः ॥ १४० ॥ सप्तच्छन्दो-
निधिः सप्तहोत्रः सप्तस्वराश्रयः ॥ सप्ताब्धिकेलिकासारः
सप्तमातृनिषेवितः ॥ ४१ ॥ सप्तच्छन्दो मोदमदः सप्तच्छ-

न्दोमखप्रभुः ॥ अष्टमूर्तिर्ध्येयमूर्तिरष्टप्रकृतिकारणम् ॥ ४२ ॥ अष्टाङ्गयोगफलभृदष्टपत्राम्बुजासनः ॥ अष्टशक्तिसमानश्रीरष्टैश्वर्यप्रवर्धनः ॥ ४३ ॥ अष्टपीठोपपीठश्रीरष्टमातृसमावृतः ॥ अष्टभैरवसेव्योष्टवसुवन्द्योष्टमूर्तिभृत् ॥ ४४ ॥ अष्टचक्रस्फुरन्मूर्तिरष्टद्रव्यहविःप्रियः ॥ अष्टश्रीरष्टसामश्रीरष्टैश्वर्यप्रदायकः ॥ नवनागासनाध्यासी नवनिध्यनुशासितः ॥ ४५ ॥ नवद्वारपुरावृत्तो नवद्वारनिकेतनः ॥ नवनाथमहानाथो नवनागविभूषितः ॥ ४६ ॥ नवनारायणस्तुत्यो नवदुर्गानिषेवितः ॥ नवरत्नविचित्राङ्गो नवशक्तिशिरोद्धृतः ॥ ४७ ॥ दशात्मको दशभुजो दशदिक्पतिवन्दितः ॥ दशाध्यायो दशप्राणो दशेन्द्रियनियामकः ॥

॥ ४८ ॥ दशाक्षरमहामन्त्रो दशाशाव्यापिविग्रहः ॥ एकादशमहारुद्रैः स्तुतश्चैकादशाक्षरः ॥ ४९ ॥ द्वादशद्विदशाष्टादिदोर्दण्डास्त्रनिकेतनः ॥ त्रयोदशाभिदा भिन्नो विश्वेदेवाधिदैवतम् ॥१५०॥ चतुर्दशेन्द्रवरदश्चतुर्दशमनुप्रभुः ॥ चतुर्दशाद्यविद्याढ्यश्चतुर्दशजगत्पतिः ॥ ५१ ॥ सामपञ्चदशः पञ्चदशी शीतांशुनिर्मलः ॥ तिथिपञ्चदशाकारस्तिथ्या पञ्चदशार्चितः ॥ ५२ ॥ षोडशाधारनिलयः षोडशस्वरमातृकः ॥ षोडशान्तपदावासः षोडशेन्दुकलात्मकः ॥५३॥ कलासप्तदशी सप्तदशसप्तदशाक्षरः ॥ ५४ ॥ अष्टादशद्वीपपतिरष्टादशपुराणकृत् ॥ अष्टादशौषधीसृष्टिरष्टादशविधिः स्मृतः ॥ ५५ ॥ अष्टादशलिपिव्यष्टिसमष्टिज्ञानकोवि-

दः ॥ अष्टादशान्नसंपत्तिरष्टादशविजातिकृत् ॥ एकविंशः पुमानेकविंशत्यङ्गुलिपल्लवः ॥ ५६ ॥ चतुर्विंशतितत्त्वात्मा पञ्चविंशाख्यपूरुषः ॥ सप्तविंशतितारेशः सप्तविंशतियोगकृत् ॥ ५६ ॥ द्वात्रिंशद्भैरवाधीशश्चतुस्त्रिंशन्महाह्रदः ॥ षट्त्रिंशत्तत्त्वसंभूतिरष्टत्रिंशत्कलात्मकः ॥ ५८ ॥ पञ्चाशद्विष्णुशक्तीशः पञ्चाशन्मातृकालयः ॥ द्विपञ्चाशद्वपुः श्रेणी त्रिषष्ट्यक्षरसंश्रयः ॥ पञ्चाशदक्षरश्रेणी पञ्चाशद्रुद्रविग्रहः ॥ ॥ ५९ ॥ चतुःषष्टिमहासिद्धियोगिनीवृन्दवन्दितः ॥ नमदेकोनपञ्चाशन्मरुद्वर्गनिरर्गलः ॥ १६० ॥ चतुःषष्ट्यर्थनिर्णेता चतुःषष्टिकलानिधिः ॥ अष्टषष्टिमहातीर्थक्षेत्रभैरववन्दितः ॥ ६१ ॥ चतुर्नवतिमन्त्रात्मा षण्णवत्यधिकप्रभुः ॥ शता-

नन्दः शतधृतिः शतपत्रायतेक्षणः ॥ ६२ ॥ शतानीकः शतमखः शतधारवरायुधः ॥ सहस्रपत्रनिलयः सहस्रफणिभूषणः ॥ ६३ ॥ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥ सहस्रनामसंस्तुत्यः सहस्राक्षबलापहः ॥ ६४ ॥ दशसाहस्रफणिभृत्फणिराजकृतासनः ॥ अष्टाशीतिसहस्राद्यमहर्षिस्तोत्रपाठितः ॥ ६५ ॥ लक्षाधारः प्रियाधारो लक्षाधारमनोमयः ॥ चतुर्लक्षजपप्रीतश्चतुर्लक्षप्रकाशकः ॥ ६६ ॥ चतुराशीतिलक्षाणां जीवानां देहसंस्थितः ॥ कोटिसूर्यप्रतीकाशः कोटिचन्द्रांशुनिर्मलः ॥ ६७ ॥ शिवोद्भवाध्यष्टकोटिवैनायकधुरन्धरः ॥ सप्तकोटिमहामन्त्रमंत्रितावयवद्युतिः ॥ ६८ ॥ त्रयस्त्रिंशत्कोटिसुरश्रेणीप्रणतपादुकः ॥ अनन्त-

देवतासेव्यो ह्यनन्तशुभदायकः ॥ ६९ ॥ अनन्तनामानन्त- सह.
श्रीरनन्तोनन्तसौख्यदः ॥ अनन्तशक्तिसहितो ह्यनन्तमु-
निसंस्तुतः ॥ अनन्तमुनिसंस्तुतः इति ॥ १७० ॥ ॥ इति
वैनायकं नाम्नां सहस्रमिदमीरितम् ॥ इदं ब्राह्मे मुहूर्ते यः
पठति प्रत्यहं नरः ॥ १ ॥ करस्थं तस्य सकलमैहिकामु-
ष्मिकं सुखम् ॥ आयुरारोग्यमैश्वर्यं धैर्यं शौर्यं बलं यशः
॥ २ ॥ मेधा प्रज्ञा धृतिः कान्तिः सौभाग्यमभिरूपता ॥
सत्यं दया क्षमा शान्तिर्दाक्षिण्यं धर्मशीलता ॥ ३ ॥ जग-
त्संवननं विश्वसंवादो वेदपाटवम् ॥ सभापाण्डित्यमौदार्यं १५
गाम्भीर्यं ब्रह्मवर्चसम् ॥ ४ ॥ ओजस्तेजः कुलं शीलं प्रता-
पो वीर्यमार्यता ॥ ज्ञानं विज्ञानमास्तिक्यं स्थैर्यं विश्वासता

तथा ॥ ५ ॥ धनधान्यादिवृद्धिश्च सकृदस्य जपाद्भवेत् ॥
वश्यं चतुर्विधं विश्वं जपादस्य प्रजायते ॥ ६ ॥ राज्ञो राज-
कलत्रस्य राजपुत्रस्य मन्त्रिणः ॥ जप्यते यस्य वश्यार्थे स
दासस्तस्य जायते ॥ ७ ॥ धर्मार्थकाममोक्षाणामनायासेन
साधनम् ॥ शाकिनीडाकिनीरक्षोयक्षग्रहभयापहम् ॥ ८ ॥
साम्राज्यसुखदं सर्वसपत्नमदमर्दनम् ॥ समस्तकलहध्वंसि
दग्धबीजप्ररोहणम् ॥ ९ ॥ दुःस्वप्नशमनं क्रुद्धस्वामिचित्त-
प्रसादनम् ॥ षड्वर्गाष्टमहासिद्धित्रिकालज्ञानकारणम्
॥ १० ॥ परकृत्यप्रशमनं परचक्रप्रमर्दनम् ॥ संग्राममार्गे
सर्वेषामिदमेकं जयावहम् ॥ ११ ॥ सर्ववन्ध्यत्वदोषघ्नं ग-
र्भरक्षैककारणम् ॥ पठ्यते प्रत्यहं यत्र स्तोत्रं गणपतेरिदम्

॥ १२ ॥ देशे तत्र न दुर्भिक्षमीतयो दुरितानि च ॥ न तद्देहं जहाति श्रीर्यत्रायं जप्यते स्तवः ॥ १३ ॥ क्षयकुष्ठप्रमेहार्शभगंदरविषूचिकाः ॥ गुल्मप्लीहा न वल्मीकमतिसारं महोदरम् ॥ १४ ॥ कासं श्वासमुदावर्तं शूलं शोफामयोदरम् ॥ शिरोरोगं वमिं हिक्कां गण्डमालामरोचकम् ॥ १५ ॥ वातपित्तकफद्वन्द्वत्रिदोषजनितज्वरम् ॥ आगन्तुविषमं शीतमुष्णं चैकाहिकादिकम् ॥ १६ ॥ इत्याद्युक्तमनुक्तं वा रोगदोषादिसंभवम् ॥ सर्वं प्रशमयत्याशु स्तोत्रस्यास्य सकृज्जपः ॥ १७ ॥ प्राप्यतेस्य जपात्सिद्धिः स्त्रीशूद्रैः पतितैरपि ॥ सहस्रनाममन्त्रोयं जपितव्यः शुभाप्तये ॥ १८ ॥ महागणपतेः स्तोत्रं सकामः प्रजपन्निदम् ॥ इच्छया सकलान् भो- सह- १६

गानुपभुज्येह पार्थिवान् ॥ १९ ॥ मनोरथफलैर्दिव्यैर्व्योमयानैर्मनोरमैः ॥ चन्द्रेन्द्रभास्करोपेन्द्रब्रह्मशर्वादिसद्मसु ॥ २० ॥ कामरूपः कामगतिः कामदः कामदेश्वरः ॥ भुक्त्वा यथेप्सितान्भोगानभीष्टैः सह बन्धुभिः ॥ २१ ॥ गणेशानुचरो भूत्वा गणो गणपतिप्रियः ॥ नन्दीश्वरादिसानन्दैर्नन्दितः सकलैर्गणैः ॥ २२ ॥ शिवाभ्यां कृपया पुत्रनिर्विशेषं च लालितः ॥ शिवभक्तः पूर्णकामो गणेश्वरवरात्पुनः ॥ २३ ॥ जातिस्मरो धर्मपरः सार्वभौमोऽभिजायते ॥ निष्कामस्तु जपन्नित्यं भक्त्या विघ्नेशतत्परः ॥ २४ ॥ योगसिद्धिं परां प्राप्य ज्ञानवैराग्यसंयुतः ॥ निरन्तरे निराबाधे परमानन्दसंज्ञिते ॥ २५ ॥ विश्वोत्तीर्णे परे पूर्णे पुनरावृत्तिवर्जिते ॥

लीनो वैनायके धाम्नि रमते नित्यनिर्वृते ॥ २६ ॥ यो नाम-
भिर्हुनेदेतैः पूजयेदर्चयेन्नरः ॥ राजानो वश्यतां यान्ति रि-
पवो यान्ति दासताम् ॥ २७ ॥ तस्य सिध्यन्ति मन्त्राणां
दुर्लभाश्चेष्टसिद्धयः ॥ मूलमन्त्रादपि स्तोत्रमिदं प्रियतमं
मम ॥ २८ ॥ नभस्ये मासि शुक्लायां चतुर्थ्यां मम जन्मनि
॥ दूर्वाभिर्नामभिः पूजां तर्पणं विधिवच्चरेत् ॥ २९ ॥ अष्ट-
द्रव्यैर्विशेषेण कुर्याद्भक्तिसुसंयुतः ॥ तस्येप्सितं धनं धान्य-
मैश्वर्यं विजयो यशः ॥ ३० ॥ भविष्यति न संदेहः पुत्रपौ-
त्रादिकं सुखम् ॥ इदं प्रजपितं स्तोत्रं पठितं श्रावितं श्रुत-
म् ॥ ३१ ॥ व्याकृतं चर्चितं ध्यातं विमृष्टमभिवन्दितम् ॥
इहामुत्र च विश्वेषां विश्वैश्वर्यप्रदायकम् ॥ ३२ ॥ स्वच्छ-

न्दचारिणाप्येषो येन संधार्यते स्तवः ॥ स रक्ष्यते शिवो-
द्भूतैर्गणैरध्यष्टकोटिभिः ॥ ३३ ॥ लिखितं पुस्तकस्तोत्रं म-
न्त्रभूतं प्रपूजयेत् ॥ तत्र सर्वोत्तमा लक्ष्मीः सन्निधत्ते निर-
न्तरम् ॥ ३४ ॥ दानैरशेषैरखिलैर्व्रतैश्च तीर्थैरशेषैरखिलै-
र्मखैश्च ॥ न तत्फलं विन्दति यद्गणेशसहस्रनामस्मरणेन
सद्यः ॥ ३५ ॥ एतन्नाम्नां सहस्रं पठति दिनमणौ प्रत्यहं
प्रोज्जिहाने सायं मध्यंदिने वा त्रिषवणमथवा संततं वा जनो
यः ॥ स स्यादैश्वर्यधुर्यः प्रभवति वचसां कीर्तिमुच्चैस्तनोति
दारिद्र्यं हन्ति विश्वं वशयति सुचिरं वर्धते पुत्रपौत्रैः ॥३६॥
अकिंचनोप्येकचित्तो नियतो नियतासनः ॥ प्रजपंश्चतुरो
मासान् गणेशार्चनतत्परः ॥ ३७ ॥ दरिद्रतां समुन्मूल्य

सप्तजन्मानुगामपि ॥ लभते महतीं लक्ष्मीमित्याज्ञा पारमेश्वरी ॥ ३८ ॥ आयुष्यं वीतरोगं कुलमतिविमलं संपदश्चार्तिनाशः कीर्तिर्नित्यावदाता भवति खलु नवा कान्तिरव्याजभव्या ॥ पुत्राः सन्तः कलत्रं गुणवदभिमतं यद्यदन्यच्च तत्तन्नित्यं यः स्तोत्रमेतत् पठति गणपतेस्तस्य हस्ते समस्तम् ॥ ३९ ॥ गणंजयो गणपतिर्हेरम्बो धरणीधरः ॥ महागणपतिर्बुद्धिप्रियः क्षिप्रप्रसादनः ॥ ४० ॥ अमोघसिद्धिरमृतमन्त्रश्चिन्तामणिर्निधिः ॥ सुमङ्गलो बीजमाशापूरको वरदः कलः ॥ ४१ ॥ काश्यपो नन्दनो वाचा सिद्धो ढौण्ढिविनायकः ॥ मोदकैरेभिरत्रैकविंशत्या नामभिः पुमान् ॥ ४२ ॥ उपायनं ददेद्भक्त्या मत्प्रसादं चिकीर्षति ॥ वत्सरं विघ्नराजोस्य तथ्यमिष्टार्थसिद्धये ॥ ४३ ॥ यः स्तौति मद्गतमना ममाराधनतत्परः ॥ स्तुतो नाम्नां सहस्रेण तेनाहं नात्र संशयः ॥ ४४ ॥ नमो नमः सुरवरपूजिताङ्घ्रये नमो नमो निरुपममङ्गलात्मने ॥ नमो नमो विपुलदयैकसिद्धये नमो नमः करिकलभाननाय ते ॥ ४५ ॥ किङ्किणीगणरचितचरणः प्रकटितगुरुमितचारुकरणः ॥ मदजललहरीकलितकपोलः शमयतु दुरितं गणपतिनृपनाम्ना ॥ ४६ ॥ इति श्रीगणेशपुराणे उपासनाखण्डे ईश्वरगणेशसंवादे गणेशसहस्रनामस्तोत्रं संपूर्णम् ॥ छ ॥ ॥ ॥

आरती गणपतीची.

श्रीगणेशायनमः ॥ ॥ सुखकर्तादुःखहर्तावार्ताविघ्नाची ॥
नुरवीपुरवीप्रेमकृपाजयाची ॥ सर्वांगींसुंदरउटिसिंदूराची ॥
कंठींझळकेमाळमुक्ताफळांची ॥ १ ॥ जयदेवजयदेवजय-
मंगळमूर्ती ॥ दर्शनमात्रेंमनकामनापुरती ॥ ध्रु० ॥ रत्नख-
चितफरातुजगौरीकुमरा ॥ चंदनाचीऊटीकुंकुमकेशरा ॥
हिरेजडितमुगुटशोभतोबरा ॥ रुणझुणतीनूपूरेंचरणींघाग-
रिया ॥ जय० ॥ २ ॥ लंबोदरपीतांबरफणिवरबंधना ॥
सरळसोंडवक्रतुंडत्रिनयना ॥ दासरामाचावाटपाहेसदना ॥
संकटींपावावेंनिर्वाणींरक्षावेंसुरवरवंदना ॥ ३ ॥ जयदेव
जयदेवजयमंगळमूर्ती ॥ दर्शनमात्रें० ॥ ४ ॥ ॥